# Devaih Krita Rudra Stuti

# देवैः कृता रुद्रस्तुतिः

## Document Information

Text title : Devaih Krita Rudra Stuti

File name : devaiHkRRitArudrastutiH.itx

Category : shiva, matsyapurANa, stuti, aShTaka

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : matsyapurANa | adhyAya 132/21-28||

Latest update : September 27, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 27, 2024

*sanskritdocuments.org*

# देवैः कृता रुद्रस्तुतिः

देवा ऊचुः ।
नमो भवाय शर्वाय रुद्राय वरदाय च ।
पशूनां पतये नित्यमुग्राय च कपर्दिने ॥ २१॥

महादेवाय भीमाय त्र्यम्बकाय च शान्तये ।
ईशानाय भयघ्नाय नमस्त्वन्धकघातिने ॥ २२॥

नीलग्रीवाय भीमाय वेधसे वेधसा स्तुते ।
कुमारशत्रुनिघ्नाय कुमारजनकाय च ॥ २३॥

विलोहिताय धूम्राय वराय क्रथनाय च ।
नित्यं नीलशिखण्डाय शूलिने दिव्यशायिने ॥ २४॥

उरगाय त्रिनेत्राय हिरण्यवसुरेतसे ।
अचिन्त्यायाम्बिकाभर्त्रे सर्वदेवस्तुताय च ॥ २५॥

वृषध्वजाय मुण्डाय जटिने ब्रह्मचारिणे ।
तप्यमानाय सलिले ब्रह्मण्यायाजिताय च ॥ २६॥

विश्वात्मने विश्वसृजे विश्वमावृत्य तिष्ठते ।
नमोऽस्तु दिव्यरूपाय प्रभवे दिव्यशम्भवे ॥ २७॥

अभिगम्याय काम्याय स्तुत्यायार्च्याय सर्वदा ।
भक्तानुकम्पिने नित्यं दिशते यन्मनोगतम् ॥ २८॥

इति मत्स्यपुराणे द्वात्रिंशदधिकशततमाध्यायान्तर्गता
देवैः कृता रुद्रस्तुतिः समाप्ता ।

मत्स्यपुराण । अध्याय १३२/२१-२८॥

पद्मपुराण । सृष्टिखण्ड । अध्याय ३८/१३५-१४५॥

matsyapurANa . adhyAya 132/21-28..

padmapurANa . sRRiShTikhaNDa . adhyAya 38/135-145..

matsyapurANa . adhyAya 132/21-28..

Proofread by PSA Easwaran

*Devaih Krita Rudra Stuti*

pdf was typeset on September 27, 2024

Please send corrections to *sanskrit@cheerful.com*